योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०८७

सप्ताशीतितमः सर्गः ८७

श्रीवसिष्ठ उवाच ।

ततश्चिदाकाशवपुर्व्याप्यनन्तो निरामयः ।

दत्तावधानो वपुषि तदा पश्याम्यहं क्वचित् ।। १

यावदन्तर्गतः सर्गः संस्थितोऽङ्कुरितोपमः ।

कुसूलस्येव बीजस्य सिक्तस्येवाङ्कुरो हृदि ।। २

ऊर्ध्वमुच्छून एवान्तःसेकाद्बीजे यथाङ्कुरः ।

आकारवत्यनाकारे चित्त्वाचित्त्वे तथा जगत् ।। ३

यथोन्मिषति दृश्यश्रीः सुषुप्ताद्बोधमेयुषः ।

जाग्रद्वा विगते स्वप्ने चिन्मात्रस्य स्वचेतनात् ।।

तथैवात्मनि सर्गादावनुभूतस्वरूपिणि ।

हृदि सर्गोदयो नान्यरूप आकाशरूपतः ।। ५

श्रीराम उवाच।

आकाशरूप आकाशे परमाकाश कथ्यताम् ।

भूयो निपुणबोधाय कथं सर्गः प्रवर्तते ।। ५

श्रीवसिष्ठ उवाच ।

शृणु राम यथापूर्वं स्वयंभूत्वं मया तदा ।

अनुभूतमसत्सद्वदिदं स्वप्नपुरोपमम् ।। ७

तमालोक्य महाकल्पसंभ्रमं व्योमरूपिणा ।

भागेऽन्यत्र शरीरस्य संविदुन्मेषिता मया ।। ८

यदैव सामला संवित्किंचिदुन्मेषिता स्थिता ।

तदैवाहं क्वचित्तत्र पश्याम्याकाशतामिव ।। ९

गतं स्वभावं चिद्व्योम यथा त्वं राम निद्रया ।

जाग्रद्वा स्वप्नलोकं वा विशन्वेत्सि ससं घनम् ।। 6.2.87.१०

दिङ्मात्राकाशमेवादौ ततोऽस्मीत्येव वेदनम् ।

तद्घनं कथ्यते बुद्धिः सा घना मन उच्यते ।। ११

तद्वेत्ति शब्दतन्मात्रं तन्मात्राणीतराण्यथ ।

पञ्चेन्द्रियाणि तत्स्थौल्यादितीन्द्रियगणोदयः ।। १२

सुषुप्ताद्विशतः स्वप्नं जगद्दृश्यघनोदयम् ।

यथा तथैव सर्गादौ दुःखं भाति निमेषतः ।। १३

तुल्यकालमनन्तेऽस्मिन्दृश्यजालावभासने ।

कथयन्ति क्रमं केचित्केचिन्न कथयन्ति च ।। १४

परमाणुकणे कान्ते संपन्नमनुभूतवान् ।

अहं चेतनमात्मानं वस्तुतोऽमलमेव खम् ।। १५

यथा स्वभावतो व्योम्नि चलत्येवानिशं मरुत् ।

तथा स्वभावात्सर्वत्र पश्यत्येव वपुस्त्विति ।। १६

यादृशं चेतितं रूपं शक्त्या परमया तया ।

तच्छक्नोत्यन्यथाकर्तुं नैषा यत्नेन भूयसा ।। १७

ततः पश्याम्यहं यावत्संपन्नोऽप्यणुरूपकः ।

चित्त्वाच्चेतस्तदेवाशु तथाभूतोऽस्मि संस्थितः ।। १८

ततोऽहं बुद्धवान्रूपं तनु तेजःकणाकृति ।

तदेव भावयन्पश्चाद्गतोऽहं स्थूलतामिव ।। १९

प्रेक्षे तावदहं किंचिदिति बोधाल्लघोस्ततः ।

मनागालोकनायैव संप्रवृत्तोऽनुभूतवान् ।। 6.2.87.२०

यन्नाम तत्र तत्किंचित्तस्येहाद्य रघूद्वह ।

शृणु नामानि मुख्यानि कल्पितानि भवादृशैः ।। २१

द्रष्टुं प्रवृत्तो रन्ध्रेण येन तच्चक्षुरुच्यते ।

यच्च पश्यामि तद्दृश्यं दर्शनं तु फलं ततः ।। २२

यदा पश्यामि कालोऽसौ यथा पश्यामि स क्रमः ।

प्रौढा नियतिरित्यस्य यत्र पश्यामि तन्नभः ।। २३

स्थितोऽस्मि यत्र देशोऽसावित्यद्यैषा प्रकल्पना ।

तदा त्वहं चिदुन्मेषमात्रात्तन्मात्रकारणम् ।। २४

पश्यामीति ततस्तत्र मनाग्वोधो ममोदभूत् ।

ततो रन्ध्रद्वयेनाहमपश्यं यत्तदप्यखम् ।। २५

याभ्यामपश्यं रन्ध्राभ्यां त इमे लोचने स्थिते ।

ततः किंचिच्छृणोमीति संविदित्युदिता मम ।। २६

ततः किंचिन्मनाङ्गात्रं झंकारं श्रुतत्रानहम् ।

प्रध्मातस्येव शङ्खस्य शब्दं व्योम्नः स्वभावजम् ।। २७

याभ्यामहमथाश्रौषं त इमे श्रवणव्रणे ।

प्रदेशाभ्यां विचरता मरुता विततस्वनम् ।। २८

स्पर्शसंवेदनं किंचिदहमत्रानुभूतवान् ।

येन नाम प्रदेशेन तेन सा त्वक्च कथ्यते ।। २९

येन स्पृष्टमिवाङ्गं तत्तदाहमनुभूतवान् ।

सत्संवेदनमात्रात्मा सोऽयं वायुरिति स्मृतः ।। 6.2.87.३०

स्पर्शनेन्द्रियतन्मात्रमिति वेदिनि संस्थितम् ।

आस्वादसंविद्याभून्मे तदास्वाद्यरसेन्द्रियम् ।। ३१

प्राणान्मे घ्राणतन्मात्रमुदितं व्योमरूपिणः ।

इत्थं न किंचित्संपन्नं सर्वं संपन्नमत्र मे ।। ३२

एवमिन्द्रियतन्मात्रजालं चेत्तत्र संस्थितः ।

यावत्तावद्विदः पञ्च बलादेव ममोदिताः ।। ३३

शब्दरूपरसस्पर्शगन्धमात्रशरीरिकाः ।

अनाकारास्तथा भातस्वरूपिण्यो भ्रमात्मिकाः ।। ३४

एवंरूपमहं जालं भावयन्यत्तदास्थितः ।

तदहंकार इत्यद्य कथ्यते त्वादृशैर्जनैः ।। ३५

एष एव घनीभूतो बुद्धिरित्यभिधीयते ।

साथ बुद्धिर्घनीभूता मन इत्यभिधीयते ।। ३६

अन्तःकरणरूपत्वमेवमत्राहमास्थितः ।

आतिवाहिकदेहात्मा चिन्मयव्योमरूपवान् ।। ३७

पवनाद्यप्यहं शून्यः केवलाकाशमात्रकः ।

सर्वेषामेव भावानां शून्याकृतिररोधकः ।। ३८

अथैवंभावनाच्चाहं यदा तत्र चिरं स्थितः ।

तदाहं देहवान्दृष्ट इति मे प्रत्ययोऽभवत् ।। ३९

तेनाहंप्रत्ययेनाथ शब्दं कर्तुं प्रवृत्तवान् ।

शून्य एव यथा सुप्तः स्वप्नोड्डीननरो रवम् ।। 6.2.87.४०

अथ पूर्वं कृतः शब्दो बालेनेव तदोमिति ।

ततः स एष ओंकार इति नीतः पुनः प्रथाम् ।। ४१

ततः स्वप्ननरेणेव यत्किंचिद्वदितं मया ।

तदेतद्विद्धि वाचं त्वं पश्चान्नीतां प्रथामिह ।। ४२

ब्रह्मैव सोऽस्मि संपन्नः सृष्टेः कर्ता जगद्गुरुः ।

ततो मनोमयेनैव कल्पिताः सृष्टयो मया ।। ४३

एवमस्मि समुत्पन्नो न तु जातोऽस्मि किंचन ।

दृष्टवानस्मि ब्रह्माण्डं ब्रह्माण्डान्तं न किंचन ।। ४४

एवं जगति संपन्ने ममैतस्मिन्मनोमये ।

न किंचित्तत्र संपन्नं तच्छून्यं व्योम केवलम् ।। ४५

इत्थं संशून्यमेवेदं सर्वं वेदनमात्रकम् ।

मनागपि न सन्त्येते भावाः पृथ्व्यादयः किल ।। ४६

जगन्मृगतृडम्बूनि भान्ति संविदि संविदः ।

न बाह्यमस्ति नो बाह्ये खे तद्व्योम तथा स्थितम् ।। ४७

मरौ नास्त्येव सलिलं संवित्पश्यति तत्तथा ।

निर्मूलमन्तःसंतप्ता स्वसंभ्रमवती भ्रमम् ।। ४८

नास्त्येव ब्रह्मणि जगत् संवित्पश्यति तत्तथा ।

निर्मूलमेव संवित्त्वादेवं भ्रान्तेश्च संभ्रमम् ।। ४९

असदेवेदमाभाति हृद्येव जगदाततम् ।

संकल्पनमनोराज्यं यथा स्वप्नपुरादिवत् ।। 6.2.87.५०

पार्श्वसुप्तजनस्वप्नस्तच्चित्तावेशनं विना ।

यथा न किंचित्तच्चित्तावेशनादनुभूयते ।। ५१

तथा जगत्तद्दृषदं संप्रविश्यानुभूयते ।

आदर्शबिम्बिताकारं दृष्टमप्यन्यथाप्यसत् ।। ५२

आधिभौतिकभावेन नेत्रेण यदि लक्ष्यते ।

तत्तन्न दृश्यते किंचिद्गिरिरेव प्रदृश्यते ।। ५३

आतिवाहिकदेहेन परं बोधदृशा यदि ।

प्रेक्ष्यते दृश्यते सर्गः परमात्मैव चामलः ।। ५४

सर्वत्र सर्गनिर्वाणं प्रज्ञालोकेन लक्ष्यते ।

ब्रह्मात्मैवान्यथा चेत्तन्न किंचिदभिलक्ष्यते ।। ५५

यत्पश्यत्यवदाता धीः सोपपत्तिविचारणा ।

न तन्नेत्रैस्त्रिभिः शर्वो नेन्द्रो नेत्रशतैरपि ।। ५६

यथा खमावृतं सर्गैस्तथा भूरिति बुद्धवान् ।

तदाहमभवं ध्याता धराधारणयान्वितः ।। ५७

तया धराधारणया धरारूपधरोऽभवम् ।

अत्यजन्नेव चिद्व्योमवपुः सम्राडिवाचिरात् ।। ५८

धराधारणया चैव धराधातूदरं गतः ।

द्वीपाद्रितृणवृक्षादिदेहोऽहमनुभूतवान् ।। ५९

संपन्नोऽस्म्यथ भूपीठे नानावनतनूरुहम् ।

नानारत्नावलीव्याप्तो नानानगरभूषणम् ।। 6.2.87.६०

ग्रामगह्वरपर्वाढ्यं पातालसुषिरोदरम् ।

कुलाचलभुजाश्लिष्टद्वीपाब्धिवलयान्वितम् ।। ६१

तृणौघतनुरोमाढ्यं गिरिखण्डकगुल्मकम् ।

दिग्वारणकटव्यूहधृतं शेषशिरःशतैः ।। ६२

ह्रियमाणं महीपालः शोभमानेभतन्तुभिः ।

प्राणिभिर्भुज्यमानाङ्गं वर्धमानं व्यवस्थया ।। ६३

हिमवद्विन्ध्यसुस्कन्धं सुमेरूदारकन्धरम् ।

गङ्गादिसरिदापूरमुक्ताहाररणत्तनुम् ।। ६४

गुहागहनकच्छादि सागरादर्शमण्डलम् ।

मरूषरस्थलश्वेतसुवराम्बरसुन्दरम् ।। ६५

भूतपूर्वैः परापूर्णं परिपूतं महार्णवैः ।

अलंकृतं पुष्पवनैः समारब्धं रजोघनैः ।। ६६

नित्यं कृषीवलैः कृष्टं वीजितं शिशिरानिलैः ।

तापितं तपनैस्तप्तैरुक्षितं प्रावृडम्बुभिः ।। ६७

विपुलाग्रस्थलोरस्कं पद्माकरकृतेक्षणम् ।

सितासितघनोष्णीषं दशाशोदरमन्दिरम् ।। ६८

लोकालोकमहाखातवलयोग्रास्यभीषणम् ।

अनन्तभूतसंघातपरिस्पन्दैकचेतनम् ।। ६९

व्याप्तमन्तर्बहिश्चैव नानाभूतगणैः पृथक् ।

देवदानवगन्धर्वैर्बहिरन्तस्तु कीटकैः ।। 6.2.87.७०

पातालेन्द्रियरन्धेषु नागासुरकृमिव्रजैः ।

सप्तस्वर्णवकोशेषु नानाजातिजलेचरैः ।। ७१

व्याप्तं नदीवनसमुद्रदिगन्तशैल-

द्वीपाख्यजन्तुविषयस्थलजङ्गलौघैः ।

नानावलीवलितमण्डलकोशखण्डं

वल्लीसरःसरिदरातिगणाब्जखण्डैः ।। ७२

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो- नि० उ० पा० पार्थिवधात्वन्तर्गतजगदानन्त्यप्रतिपादनं नाम सप्ताशीतितमः सर्गः ।।८७।।